सं ष्ठवोधात्मने सत्वाय । रं ष्ठकृत्यात्मने रजसे । तं
मोहात्मने तमसे नमः औं ग्रात्मने नमः श्चं श्चेतरा
त्मने पं परमात्मने नमः ह्रौं ज्ञानात्मने । ज्ञानतत्वात्म
ने । मायातत्वात्मने । कलातत्वात्मने । वियातत्वात्म
ने । परतत्वात्मने । मोहिनी श्रीपा । क्षोभिणी श्रीपा ।
वज्रिणी श्री । स्तंभिनी श्री । आकर्षिणी श्री । द्राविणी
श्री । आह्लादिनी श्री । क्लिन्ना श्री । क्लेदिनी श्रीपाडकाए

पू॰ जयाम्बिनमः ह्स्क्लींसर्वशक्तिकमलासनायनमः ध
५॰ समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिग
50 र्भरहस्यपरापररहस्यपरापरातिरहस्ययोगिनी
चक्रश्रीपादुकाभ्योनमः इतिसमस्तचक्रेसंपूज्य
ऐं॰ बिन्दुचक्रे ऐंक्लींह्रींभगवतिह्लूंनित्यकामेश्वरिसौः
सर्वजनवशंकरिसः त्रिपुरभैरविऐंविच्चेह्रींश्रीम
हात्रिपुरांबाश्रीपा॰ इतिपूर्णविद्ययात्रिःसंपूज्य पु

नर्मूलेनचत्रिः संपूज्य श्रीचक्रंपुरत्रयात्मकंध्या
त्वातत्रचतुरस्रत्रयषोडशदलाष्टदलात्मकेप्रथम
चक्रे ष प्रथमकूटमुच्चार्यशारीरात्मनेनमः चतुर्द
शारदशारद्वयात्मकेमध्यचक्रे ष द्वितीयंकूटंतु
स्वात्मनेनमः अष्टारत्रिकोणबिंद्वात्मकांतश्चक्रे ष
तृतीयंप्राणात्मनेनमः इतिसंपूज्यपुनरपि चतुर
स्रचक्रे ष प्रथमकूटंशरीरात्मनेनमः षोडशदले ष

पू॰
५८ द्वितीये बुद्ध्यात्मने॰ अष्टदले च तृतीये प्राणात्मने॰
चतुर्दशारे च प्रथमे शरीरात्मने॰ बहिर्दशारे च द्वि
५१ तीये बुद्ध्यात्मने॰ अन्तर्दशारे च तृतीये प्राणात्मने अ
ष्टारे च प्रथमे शरीरात्मने॰ त्रिकोणे च द्वितीये बुद्ध्या
त्मने नमः बिन्दौ च तृतीये प्राणात्मने नमः त्रिकोण
स्याग्रकोणे च प्रथमकूटकामरूपपीठाय नमः आ
ग्नेये च द्वितीये जालंधरपीठायः ईशाने च तृतीये पू

ण्णिरिपीठाय॰ मध्ये बिंदौ च पंचदशीमहोड्यान
पीठाय पुनर्बिंदौ महोड्यानपीठेसहस्रदलकम
लासनायनमः चतुरस्रे च ऐंक्लींसौः त्रिपुराम्बा
शिवा सनाय॰ पद्मद्वये च ऐंक्लींसौः त्रिपुरेश्वरी
पीताम्बुजासनाय चतुर्दशारे च ह्रींक्लींसौः त्रिपुर
सुंदरीदेव्यात्मासनाय॰ दशारद्वये च हैंह्क्लींह्सौः त्रि
पुरवासिनीसर्वचक्रासनाय॰ अष्टकोणे च ह्सैंह्स्क

सू- ह्लीं ह्स्सौः त्रिपुराश्री सर्वसंक्षोभणासनाय । त्रिकोणे बिं
५२ दौ च श्रीं ह्रीं क्लीं ब्लें त्रिपुरमालिनी साध्यसिद्धासना
य । इति षडासनानि पादतलिप्येन संपूज्य पुनः च
तुरस्रे च नादशक्तिश्री । षोडशदले च बिंदुशक्ति
श्री । अष्टदले च कालशक्तिश्री । चतुर्दशारे च ज्ये
ष्ठाशक्तिश्री । बाह्यदशारे च रौद्रीशक्तिश्री । अंतर्द
शारे च वामाशक्तिश्री । अष्टकोणे च विषघ्नीश

क्तिश्री-त्रिकोणे च तरीशक्तिश्री- बिंदौ च सर्वा
नंदशक्तिश्रीपादुकां पूजयामि नमः इति नवशक्तीः
संपूज्य षट्त्रिंशत्तत्त्वात्मकं श्रीचक्रं ध्यात्वा च अंकं खं
गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं
भं मं यं रं लं वं शं षं सं हं ळं क्षं शिव शक्ति सदाशि
वेश्वरशुद्धविद्यामायाकलाविद्यारागकालनि
यतिपुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्‌।

पू० त्वग्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूप
५३ रसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मने श्रीमहा
53 त्रिपुरसुंदरीयोगपीठासनाय नमः इति पुष्पांजलि
नासमस्तं पीठं संपूज्य तत्र तदुपरि प्रसूनतूलिका
कल्पयामीति मध्ये पुष्पं निक्षिप्य तदुपरि च ह्रीं श्रीं
सौः श्रीमहात्रिपुरसुंदर्याः सकलैश्चैतन्यानंदमयीं
श्रीकामेश्वरकामेश्वरीमूर्तिं कल्पयामीति पुष्पादि प्र

ह्लेयेण ध्यानेकां मूर्तिं भावयन्मूलमुच्चार्य परमेष्ठी
कामेश्वरकामेश्वरीमूर्त्यै नमः इतिकल्पितमूर्तिंपू
जयेत् इतियोगपीठपूजा अथ श्रीचक्रपूजा तत्र
श्रीगुरुपादुकाविद्यया शिरसि श्रीगुरुपादुकां संपू
ज्य नमोऽस्तु गुरवे तस्मै इत्यादिना प्रणम्य श्रीगुरोर्द
क्षिणमूर्तिं भक्त्यानुग्रहविग्रह अनुज्ञां देहि भगवन्
श्रीचक्रयजनाय मे इति गुर्वाज्ञां प्राप्य मूलेन प्राण

पू- ५४ 54

यामत्रयंविधाय मूलविद्यायाऋष्यादिकरषडंगन्या
सान्विधायमूलेनव्यापकंचविन्यस्य पुष्पांजलिमादा
य त्रिविधमुद्रांबद्ध्वाहृदिश्रीचक्रराजेदेवींयथोक्तरू
पां सपरिवारांध्यात्वातेजोरूपतामापाद्यान्तर्मुद्राप्र
योगेणमूलाधारात्कुंडलिनीमुत्थाप्यतयासहषट्
चक्रभेदक्रमेण हृदयांतःस्फुरंतींतांतेजोमयींसु
षुम्णामार्गेणब्रह्मरंध्रंनीत्वा तत्तेजःसंगमेनाऽमृतमहा

त्रुयोत्तीर्णं विग्रहस्य शिवशक्तिसामरस्यस्त्वमनुभू
य ध ह्सैं ह्स्क्ल्रीं ह्सौः नमो महात्रिपुरसुंदरि महा
पद्मवनान्तःस्थे कारणानंदविग्रहे सर्वभूतहितेमा
तरेश्वरि परमेश्वरि एह्येहि देवदेवि शिवत्रिपुरे देवपू
जिते. परामृतप्रिये श्रीचक्रसान्निध्यं कुरु सिद्धिदे देवि
शिभक्तसकलभपरिवारसमन्विते यावत्त्वां पूजयि
ष्यामि तावत्त्वं सुस्थिरा भव इत्यावाहनमंत्र मुद्राये

पु:
५५
55

वहन्नासाधनाकरस्यपुष्पांजलौ ततेजः समानीय
श्रीपीठं ततः कल्पितमूर्तेः शिरसि ब्रह्मरंध्रस्थाने सनि
वेश्य कामेश्वरांकस्थां सावरणां श्रीमहात्रिपुरसुंदरी
सर्वावयवाभरणवतीं ध्यायन् ध मूलमुच्चार्य श्रीम
हात्रिपुरसुंदरी इहागच्छ २ इह संतिष्ठ २ इह संनिधेहि
२ इह संनिरुध्यस्व २ इह संमुखीभव २ इहावगुंठिता
भव २ अनेंदैवांगेषडंगन्यासेन सकलीकृत्य

तेषेवधेनुमुद्रयाऽमृतधारयाऽभिषेचनेनाऽमृ
तीकृत्य महामुद्रयापरमीकुर्यादावाहनादिमु
द्राः प्रदर्शयेच्च ततोमूलविद्यापूर्वोक्तदीपिनीवि
द्यामाऽदित्वातांमातृकांवोच्चार्यमूलदेवींत्रिःसंप्रोक्ष ४
श्रीं ह्रूं क्लीं ह्रौं गणपकालिकेसौः सकलह्रीं क्लीं ब्लूं
ह्रींश्रीं इतिजीवन्यासविद्ययादेव्याहृदयकमलेजी
वंसंस्थाप्य प्राणप्रतिष्ठांकुर्यात् ४ ॐ क्रां ह्रीं क्रोंयरं

लं वं शं षं सं हं ह्सौं हंसः सोहं श्रीमहात्रिपुरसुंदर्याः
इह प्राणाः ७ इह जीवः स्थितः ७ इह सर्वेंद्रियाणि
स्थितानि ७ इह वाङ्मनःश्रोत्रजिह्वाघ्राणप्राणा इहाग
त्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां विधाय ततः
संक्षोभणद्रावणाकर्षणवश्योन्मादांकुशखेचरीबीज
योनित्रिखंडानवमुद्राः प्रदर्श्य द्रां द्रीं क्लीं ब्लूं सः क्रों ह्सखफ्रें
ह्सौः ऐं इति प्रत्येकबीजोच्चारणेनैकैकां मुद्रां प्रदर्श्य

ह्रीं स्त्रौं इति पाशमुद्रां क्रों क्रों इति अंकुशमुद्रां थ्यें थें इ
ति पञ्चमुद्रा द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां इति दश
भिर्बीजैर्बाणमुद्रां च प्रदर्श्य ४ मूलं श्रीमहात्रिपुर
सुन्दरी श्रीपादुकां पूजयामि नमस्तर्पयामि नमः इ
ति देवीं त्रिः संपूज्य वामतत्त्व [illegible] मुद्रया विशेषार्घ्य
विन्दुभिस्त्रिः संतर्प्य आसनादिषोडशोपचारान्कृया
त् नत्व मूलमुच्चार्य भगवति श्रीमहात्रिपुरसुंदरि त्व

सु॰ ध्यमिदमासनेकल्पयाम्यऽज्ञामम्यांभगवन्याहृत्यास
५०२दं॰ नेकल्पयित्वाहेंहेंहेंइँदेइदेगदद्दाणस्वाहा इतिप्राध्य
51 नामंत्रेणनिवेदयेत् ततःपुनःमूलंश्रीमहात्रिपुर
सुंदरिस्वागतेसुस्वागते ततोमूलंश्रीमहात्रिपुरसुंद
रीश्रीपादुकायैपाद्यंपरिकल्पयामिनमः इतिदेव्याःपा
दयोःपाद्यंदद्यात् मूलंश्रीमहात्रिपुरसुंदरीश्री
पादुकायै अर्घ्यंपरिकल्पयामिनमः ॐॐॐॐ

इतिसामान्यार्घ्योद्देव्याः शिरसि किंचिज्जलं दद्यात् एव
माचमनीयं मधुपर्कं नानाविधैर्वैदिकतान्त्रिकैर्मंत्रैः
स्नानं वस्त्रयुग्मं पुनराचमनीयं नानाविधानलंकारान्
प्रार्थनामंत्रेण पृथक्पृथङ्निवेद्य स्ववामभागे चंडा
मस्त्रेण प्रोक्षयेत्तु मुद्रयाऽस्त्रीकृत्य गंधादिभिः संपू
ज्य ॐ जगद्धुनि मंत्रमातः स्वाहा इत्यभिमंत्र्य वामह
स्तेन तां वा दद्यात् मूलं वनस्पतिरसोदिव्यो गंधाढ्यः स

पु. नोहरः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां श्री
५८ महात्रिपुरसुंदरीश्रीपादुकायै धूपं परिकल्पयामि
58 नमः इतिनीचैः धूपं मूलेन सुप्रकाशो महादीपः स
र्वतस्तिमिरापहः प्रसीद मम देवेशि दीपोयं प्रतिगृ
ह्यताम् श्रीमहात्रिपुरसुंदरीश्रीपादुकायै दीपं प
रिकल्पयामिनमः इतिशिरसि उच्चैर्दीपं मूलेन समवारा
भिमंत्रितं नैवेद्यं तांबूलं प्रणामं ह्रें ह्रं ह्रमिदमिदमिदं गृहाण स्वाहा

इति मंत्रेण निवेदयेत् ततो योनिमुद्रया प्रणमच्छ्री
मिति नमस्कारमुद्राबद्धा मूलेन प्रणम्य हृमिति सृ
जेत् ततो देव्यंगेषु षडंगमंत्रैः सकलीकृत्य संक्षो
भणादित्रयोदशमुद्राः प्रदर्श्य मूलेन देवीं त्रिः संपू
ज्य वामहस्तेन विशेषार्घ्यबिंदुभिस्त्रिः संतर्प्याऽवर
णपूजां कुर्यात् ततः कृतांजलिः मूलं मंत्रं विन्मये प
रे देवि परामृतचरुप्रिये अनुज्ञां त्रिपुरे देहि परिवा

पू॰
५५
59

गार्चनायमे इत्याज्ञां प्रार्थ्य सच्चिदानंदलक्षणां श्रीम
हात्रिपुरसुंदरीमेव श्रीचक्रदेवतारूपेण परिणतां ध्या
त्वा तद्देवताः पूजयेत् तत्रादौ बिंदुचक्रे ॥ मूलं पंचदशी
श्रीमहात्रिपुरसुंदरीनित्याश्रीपादुकां पूजयामि नमः
इति गंधादिना संपूज्य तर्पयामि नमः इति विशेषार्घ्येण
संतर्प्य मूलदेव्यामेव तत्तिथिनित्यामुच्चार्यो ऽमु॰
कतिथिनित्याश्रीपादुकां पूजयामि नमः तर्प[illegible]या॰

अत्र तिथिनित्यापूजायां शुक्लपक्षे प्रतिपदमारभ्य पौ
र्णमास्यन्ते कामेश्वर्यादि चित्रान्तास्तु पंचदशनित्याः स्व
एकस्यां तिथौ एकैका नित्या तिथिनित्यात्वेन पूजयेत् कृ
ष्णपक्षे प्रतिपदमारभ्यामावस्यान्तं चित्रादिकामेश्वर्यं
ताः पंचदशनित्या विलोमेन पूजयेत् अत्र तिथिवृद्धा
वेऽका नित्या दिनद्वयेपि पूज्या तिथिक्षयेपि एकस्यां ति
थौ नित्याद्वयं पूजयेत् पुनश्चात्रोदयव्यापिनी तिथिरह्नो

पू. गात्रव्यापिनीनित्यांत्रिकस्थितांतः इतितिथिनित्यापूजां
९. विधाय त्रिकोणेवामावर्तेनदक्षिणरेखायां ह्रीं श्रीं अं
60 कामेश्वरीनित्याश्रीपादुकांपू. तर्प. १ ह्रीं श्रीं आं भग
मालिनीनित्याश्रीपा २ ह्रीं श्रीं इं नित्यक्लिन्नानित्याश्रीपा.
३ ह्रीं श्रीं ईं भेरुंडानित्याश्रीपा. ४ ह्रीं श्रीं उं वह्निवासिनीनि
त्याश्रीपा. ५ ह्रीं श्रीं ऊं महावज्रेश्वरीनित्याश्रीपा. ६ ह्रीं
श्रीं ऋं शिवदूतीनित्याश्रीपा. ७ ह्रीं श्रीं ॠं त्वरितानित्याश्रीपा. ८

ह्रौं श्रीं ल्रें कुलसुंदरी नित्या श्री· ९ ह्रीं श्रीं ल्रुं नित्यानि
त्या श्रीपा· १०· ह्रीं श्रीं ऍं नील पताका नित्या श्रीपा· ११
ह्रीं श्रीं यें विजया नित्या श्रीपा- १२ ह्रीं श्रीं श्रों सर्वमंगला
नित्या श्रीपा- १३ ह्रीं श्रीं श्रौं ज्वालामालिनी नित्या श्रीपा· १४
ह्रीं श्रीं श्रें विज्ञा नित्या श्रीपाडुकां पूजयामि नमस्तर्पयामि
नमः १५ इति वामावर्तेन रेखात्रये पंचपंचसंपूज्य वि
शेषार्च्यामृतेन तर्पयेत् पुनर्बिंडचक्रे ग्रः मूलं पंचद

पू. ऐंह्रीं श्रः श्रीमहात्रिपुरसुंदरी नित्याश्रीपादुकां पू. तं. त
८१ र्पयामि १९ श्रः तुर्यकूटे. श्रः महासमादशीकलातीतानि
61 त्याश्रीपादुकां पू. तं. इति संपूज्य विशेषार्घ्येण संतर्प्य पुनः
शाद्यतिथिनित्यायैर्गंधादिभिः संपूज्य तत्तिथिनैवेद्यं
निवेदयेत् प्रतिपदि घृतं १ शर्करा २ दुग्धं ३ अपूपं ४
कदलीफलं ५ मातिंकं ६ गुडं ७ नारिकीलफलं ८
लाजा ९ तिला १० दधि ११ पृथुकाः १२ चणकाः १३

मुद्राः १४ पायसं १५ पवैंनन्नतिथिषुनन्नेत्रे वेयंनिवे
दयमध्यत्रिकोणाष्टदभागेरेखात्रयंविभाव्यतत्राघोघः
क्रमेणगुरुपंक्तित्रयंपूजयेत् धं पैं दिव्यौघेभ्यः पराद्वि
भ्यः श्रीगुरुभ्यो नमः इति प्रथमतः समुदायेन पुष्पा
ञ्जलिं दत्वा धं पैं परमशिवानंदनाथश्रीपादुकां पूज·
धं पैं कामेश्वरीदेव्यंबाश्रीपा· धं पैं दिव्यौघानंदनाथ
श्रीपा· धं पैं महौघानंदनाथश्रीपा· धं पैं सर्वानंदनाथ

सू॰ श्रीपा॰ धं पैं प्रज्ञादेव्यम्बाश्रीपा॰ धं पैं प्रकाशानंदनाथ
६२ श्रीपादुकां पू॰ त॰ इति प्रथमरेखायां धं पैं सिद्धौघेभ्यः
62 परापरर्षिभ्यो गुरुभ्यो नमः इति पुष्पाञ्जलिं दत्त्वा धं दि
व्यानंदनाथश्रीपा॰ धं चिदानंदनाथश्रीपा॰ धं कैव
ल्यानंदनाथश्रीपा॰ धं देव्यम्बाश्रीपा॰ धं महोदया।
नंदनाथश्रीपादुकां॰ पू॰ त॰ इति द्वितीयरेखायाम्
धं पैं मानवौघेभ्यः परर्षिभ्यो गुरुभ्यो नमः ।

इतिसमुदायेनपुष्पांजलिंदत्वा धं ऐं विदानंदाना
थश्रीपा· धं· ऐं विश्वशान्त्यानंदनाथश्रीपा· धं ऐं रमा
नंदनाथश्रीपा· धं ऐं कमलानंदनाथश्रीपा· धं ऐं
महोदयानंदनाथश्रीपा· धं ऐं स्वात्मानंदनाथश्रीपा·
धं ऐं प्रतिभानंदनाथश्रीपाडकांपूजयामिनमःसर्वपं
यामिनमः इतिसंपूज्य विशेषार्घ्यविंदुभिःसंतर्प्य
श्रेवेव धं ऐं अमृतकानंदनाथश्रीपा· इत्येवंप्रकारेणगु

पू॰ परमगुरुपरमेष्ठिगुरून्पूजयेत्तर्पयेच्च वामकरम
६३ ध्यमांगुष्ठाभ्यां गुरुतर्पणं विधेयं देवीतर्पणं त्वा
63 मानामांगुष्ठाभ्यामिति वोध्यमिति गुरुपूजा अथ षडंग
युवतीपूजा तत्र मध्यत्रिकोणाद्दक्षिणाग्रे ऐं ऐं सर्वज्ञा
हृदयशक्तिश्रीपा॰ ऐशान्यां ऐं क्लीं नित्यतृप्ता शिरःश
क्तिश्री॰ नैर्ऋते ऐं सौः अनादिबोधा शिखाशक्तिश्री वायव्ये ऐं
ऐं स्वतन्त्रा कवचशक्तिश्री॰ देवाग्रे त्रिकोणाद्बहिः ऐं क्लीं नि
त्यमलुप्ता नेत्रशक्तिश्री॰ पूर्वादिचतुर्दिक्षु पादतलेष्वन ऐं

सोः अनंतास्त्वशक्तिश्रीपा॰ पू॰ तः इति षडंगयुवतीपू
जा अथ नवावरणपूजा तत्र ॐ मूलं समस्तप्रकट
गुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरा
परराहस्यपरापरातिरहस्ययोगिनीश्रीपादुकांपू
जयामिनमः इति श्रीचक्रे पुष्पांजलिं दत्वा ॐ ऐं श्रीं
सौः त्रैलोक्यमोहनचक्रायनमः इति समुदायेन पु
ष्पांजलिनावतरणत्रयं संपूज्य ॐ चतुरश्रादिरेखा

पू॰
१४॰
६५

यै नमः इति प्रणम्य मध्ये वां सं पूज्य तत्र देव्यग्रादि द्वार चतुष्टये देवी दक्षिणाग्रादि कोण चतुष्टये इंद्रेशानयोर्मध्ये निर्ऋति वरुण योर्मध्ये अणिमादि दश शक्तीः पूजयेत् ॐ अणिमासिद्धि श्रीपा॰ पू॰ त॰ ॐ लघिमासिद्धि श्रीपा॰ पू॰ त॰ ॐ महिमासिद्धि श्रीपा॰ पू॰ त॰ ॐ ईशित्व सिद्धि श्रीपा॰ वशित्व सिद्धि श्री॰ ॐ प्राकाम्य सिद्धि श्री॰ ॐ भुक्ति सिद्धि श्री॰ ॐ इच्छा सिद्धि श्रीः ॐ प्राप्ति सिद्धि श्री॰ ॐ सर्वकाम सिद्धि श्रीपा॰ ३॰ पू॰ त॰

ततश्चतुरश्रमध्यरेखायै नमः इति मध्यरेखां संपू
ज्य तत्र ब्राह्म्याद्याश्चाष्टमातॄर् ईशाणाद्वामभागेषु प्राग
कोणेषु च प्रारभ्येमाः पूजयेत् यथा ॐ ब्राह्मीश्री
पादुकां पू· त· माहेश्वरीश्रीपा· पू· त· ॐ कौमारीश्री
पा· ॐ वैष्णवीश्रीपा· ॐ वाराहीश्रीपादुकां पू· त· ॐ इं
द्राणीश्री· ॐ चामुण्डाश्रीपा· ॐ महालक्ष्मीश्रीपा· पू· त· ॐ
ॐ ततश्चतुरश्रद्वारेखायै नमः इति तृतीयरेखां संपूज्य· त

पू॰ ६५
65

त्र प्रथमरेखावदेव दशमुद्रादेवीः प्रादक्षिण्येन पूज
येत् ॐ द्रां सर्वसंक्षोभिणीमुद्राश्रीपा॰ ॐ द्रीं सर्वविद्रा
विणीमुद्राश्रीपा॰ ॐ क्लीं सर्वाकर्षिणीमुद्राश्री॰ ॐ ब्लूं
सर्ववश्यमुद्राश्रीपा॰ ॐ सः सर्वोन्मादिनीमुद्राश्रीपा॰ ॐ
क्रों महांकुशामुद्राश्रीपा॰ ॐ ह्स्रैं हसकलरीं ह्स्रौः त्रि
खण्डामुद्राश्रीपा॰ ह्सौः बीजमुद्राश्रीपा॰ हसखफ्रें खे
चरीमुद्राश्रीपा॰ ॐ ऐं योनिमुद्राश्रीपा॰ इति संपूज्य

विशेषार्घामृतेन संतर्प्य धूं अं आं सौः त्रिपुराचक्रेश्व
री श्रीपा० धूं द्रां सर्वसंक्षोभिणीमुद्राश्रीपा० धूं अणिमा
सिद्धिश्रीपा० द्रां इति सर्वसंक्षोभिणीमुद्रां प्रदर्श्य धूं प्र
नाः प्रकटयोगिन्यस्त्रैलोक्यमोहने चक्रे समुद्राः ससि
द्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पू
जिताः सन्तर्पिताः सन्तु नमः इति चक्रेश्रपा वामहस्ते सामा
न्यार्घजलदानेन पूजां समर्प्य मूलेन मूलदेवीं संपूज्य

पू॰
९९
66

संतर्पणमुद्रांजलिमादाय मूलं श्रीमहात्रिपुरसुंदरि
श्रीपादुकाः पूजयामि तर्पयामि नमः इति त्रिः संतर्प्य अभीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्पये
तुभ्यं प्रथमावरणार्चनम् इति देव्याग्रे रणायोः पुष्पां
जलिं दत्त्वा प्रकटयोगिनीमूलं बोधये श्रीमहात्रिपुरसुं
दर्यै नमः इति योनिमुद्रया प्रणमेत् इति प्रथमावर
णपूजा ततः षोडशदलकमले चक्रे स्ववर्णपूर्वमूर्णां
चंद्रनिभे ऐं क्लीं सौः सर्वाशापरिपूरकचक्राय नमः

इति पुष्पांजलिं निक्षिप्य देव्यग्रदलमारभ्य वामावर्तेन
षोडश नित्याः कलाः पूजयेत् ॐ अं कामाकर्षिणी नि
त्याकलाश्रीपा० ॐ आं बुद्ध्याकर्षिणी नित्याकलाश्री० ॐ
इं अहंकाराकर्षिणी नित्याकलाश्री० ॐ ईं शब्दाकर्षिणी
नित्याकलाश्रीपा० ॐ उं स्पर्शाकर्षिणी नित्याकलाश्री० ॐ
ऊं रूपाकर्षिणी नित्याकलाश्री० ॐ ऋं रसाकर्षिणी नित्याक
लाश्री० ॐ ॠं गंधाकर्षिणी नित्याकलाश्री० ॐ ऌं चित्ताकर्षि

शु॰ णीनित्याकलाश्रीपा॰ धं लूं धैर्याकर्षिणीनित्याकलाश्री
८७ पा॰ धं पैं स्मृत्याकर्षिणीनित्याकलाश्रीपा॰ धं पैं नामाकर्षि
णीनित्याकलाश्रीपा॰ धं श्रौं बीजाकर्षिणीनित्याकलाश्री॰ धं
श्रौं आत्माकर्षिणीनित्याकलाश्रीपा॰ धं अं अमृताकर्षिणी
नित्याकलाश्रीपा॰ धं अः शरीराकर्षिणीनित्याकलाश्री
पादुकां पूज॰ इति सम्पूज्य संतर्प्य धं द्रैं क्लीं सौः त्रिपुरेश्वरी
चक्रेश्वरीश्रीपा॰ पू॰ त॰ धं द्रीं सर्वविद्राविणीश्रीपा॰ धं

लचिमासिद्धिश्रीपा- इति संपूज्य विशेषार्घ्यबिंदुभिः सं
तर्प्य ह्रीमिति मूलदेव्यै सर्वविद्राविणी मुद्रां प्रदर्श्य ध्ये
सामास्मार्घ्योदकं गृहीत्वा ध्ये पताग्रुप्तयोगिन्यः सर्वा
शापरिपूरके चक्रे समुद्राः ससिद्धयः सायुधाः सवा
हनाः सपरिवाराः सर्वोपचारैः पूजिताः तर्पिताः संत
नम इति चक्रेश्वरी हस्ते नज्जलदानेन पूजां समर्प्य
मूलेन मूलदेवीं संपूज्य विशेषार्घ्यबिंदुभिः संतर्प्य ३

पू० पुष्पाञ्जलिमादाय मूलं श्रीमहात्रिपुरसुन्दरि अभीष्ट
६८ सिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्पये तुभ्यं
68 द्वितीयावरणार्चनम् इतिदेव्याश्चरणयोः पुष्पाञ्जलिं
दत्वा ऐं गुप्तयोगिनीमयूखायै श्रीमहात्रिपुरसुन्दर्यै न
मः इतियोनिमुद्रया प्रणमेत् इति द्वितीयावरण
पूजा ततोऽष्टदलकमलं जपाकुसुमसप्रभं ध्यात्वा
ऐं ह्रीं क्लीं सौः सर्वसंक्षोभणचक्राय नमः ः

इत्यष्टदले पुष्पाञ्जलिं निक्षिपेत् तत्र देवीपृष्ठभागस्य
पूर्वदलमारभ्यादिग्दलचतुष्टये प्रादक्षिण्येन ॐ कं ष
अनंगकुसुमाश्रीपा० पू० त० ॐ चं ष अनंगमेखलाश्री
पा० पू० त० ॐ ठं ष अनंगमदनाश्रीपा० पू० त० ॐ अनंग तंष ९
मदनातुराश्री० आग्नेये ॐ पं ष अनंगरेखाश्री० नैरृ
ते ॐ यं र अनंगवेगिनीश्रीपा० वायव्ये ॐ शं र अनंगांकु
शाश्रीपा० ईशानकोणे ॐ लं क्षं अनंगमालिनीश्रीपा० इ

पू॰ तिसंपूज्यसंतर्प्य। ऐं ह्रीं क्लीं सौः त्रिपुरसुन्दरीचक्रेश्व
६५ रीश्रीपा। इतिचक्रेश्वरीसंपूज्यसंतर्प्य। ऐं क्लीं सर्वाक
69 र्षिणीमुद्राश्रीपा। ऐं महिमासिद्धिश्रीपा। पू॰त॰ ऐं एता
गुप्ततरयोगिन्यः संक्षोभकारकेचक्रे समुद्राः ससिद्धय
इत्यादिना सामान्यार्घोदकेन चक्रेश्वरीहस्ते पूजां सम
र्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य पुष्पाञ्जलि
मादाय मूल श्रीमहात्रिपुरसुन्दरी ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्पये
तुभ्यं तृतीयावरणार्चनम् इति संपूज्य श्रीगुप्ततरयो
गिनीमयूखावाप्त्यै श्रीमहात्रिपुरसुंदर्यै नमः इति योनि
मुद्रया प्रणमेत् इति तृतीयावरणपूजा ततश्चतुर्दशा
रेदाडिमीकुसुमप्रभं ध्यात्वा ऐं ह्रैं ह्क्लीं ह्सौः सर्वसौ
भाग्यदायकचक्राय नमः इति चतुर्दशारे पुष्पांजलिं द
त्वा देव्यग्रकोणमारभ्य वामावर्तेन चतुर्दशशक्तीः पूजये

सू. यथा ॥ ॐ कं सर्वसंक्षोभिणीशक्तिश्रीपा पू. त. ॐ खं सर्व
७. विद्राविणीशक्तिश्रीपा. पू. त. ॐ गं सर्वाकर्षिणीश
70 क्तिश्रीपा. ॐ घं सर्वाह्लादिनीशक्तिश्रीपा. ॐ ङं सर्वसंमोह
नीशक्तिश्रीपा. ॐ चं सर्वस्तम्भनीशक्तिश्रीपा. ॐ छं सर्वजृं
भणीशक्तिश्री. ॐ जं सर्ववशंकरीशक्तिश्रीपा. ॐ झं स
र्वरंजनीशक्तिश्री. ॐ ञं सर्वोन्मादिनीशक्तिश्री. ॐ टं स
र्वार्थसाधनीशक्तिश्रीपाकां पूजयामि. त. ॐ ठं सर्व

संपत्त्रिपूरणीशक्तिश्री· पं ॐ सर्वमंत्रमयीशक्तिश्रीः
पं ह्रीं सर्वद्वंद्वक्षयंकरीशक्तिश्रीपा· पू॰ त॰ पं ह्रैं ह्स्क्लीं
ह्सौः त्रिपुरवासिनीचक्रेश्वरीश्रीपा· पू॰ त॰ पं ब्लूंस
र्ववश्यमुद्राश्री· पं ईशित्वसिद्धिश्री· पू॰ त॰ ब्लूं इति स
र्ववश्यमुद्रांप्रदर्श्य पं एताः संप्रदाययोगिन्यः सर्व
सौभाग्यदायके चक्रे समुद्राः ससिद्धयः सायुधार
स्मादिनाविशेषार्घ्यजलेन चक्रेश्वरीवामहस्तेपूजोस

पू॰ ७२ मर्घ्यं मूलेन मूलदेवीं संपूज्य विशेषार्घ्योदकेन संत-
र्प्य पुष्पांजलिमादाय मूलं श्रीमहात्रिपुरसुंदरि अ-
भीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्प-
ये तुभ्यं चतुर्थावरणार्चनम् इति समर्प्य संप्रदाय
योगिनीमयूखायै श्रीमहात्रिपुरसुंदर्यै नमः
इति योनिमुद्रया प्रणमेत् इति चतुर्थावरण
पूजा ततो बहिर्दशारे सिंहखण ये ::

ह्सैं ह्सक्लीं ह्सौः सर्वार्थसाधकचक्रायनमः
इतिपुष्पाञ्जलिंनिक्षिप्य ॐ णं सर्वसिद्धिप्रदादेवीश्री·
ॐ तं सर्वसम्पत्प्रपूरणीदेवीश्रीपा· ॐ थं सर्वप्रियं
करीदेवीश्री· ॐ दं सर्वमंगलकारिणीदेवीश्रीपा· ॐ
धं सर्वकामप्रदादेवीश्री· ॐ नं सर्वदुःखविमोचिनी
देवीश्री· ॐ पं सर्वमृत्युप्रशमनीदेवीश्री· ॐ फं सर्व
विघ्नविनाशिनीदेवीश्री· ॐ बं सर्वाङ्गसुंदरीदेवीश्री·

पू॰ ७२

ऐं भं सर्वसौभाग्यदायिनीदेवीश्री॰ इति दक्षयकोण-
मारभ्य वामावर्तेन दशदेवीः संपूज्य संतर्प्य ऐं हसैं
ह्सकलीं हसनेसौः त्रिपुराश्रीचक्रेश्वरीश्री॰ ऐं सः स
र्वोन्मादिनीमुद्राश्री॰ ऐं वशित्वसिद्धिश्री॰ सः इति सर्वो
न्मादिनीमुद्राप्रदर्श्य ऐं एताः कुलकौलयोगिन्यः स
र्वाभ्यसाधकेचक्रे समुद्रा॰ इत्यादिनाचक्रेश्वरीहस्ते
पूजांसमर्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य मूलं श्री

72

महात्रिपुरसुंदरि अभीष्टसिद्धिमित्यादि पंचमावर
णार्चनम् इति देव्यै पुष्पांजलिं समर्प्य कुलकौल
योगिनीमयूखायै श्रीमहात्रिपुरसुंदर्यै नमः इ
ति योनिमुद्रया प्रणमेत् इति पंचमावरणपूजा न
तोऽन्तर्दशारे जयाकुसुमवर्णे ह्रीं क्लीं ब्लें सर्वरक्षा
करचक्राय नमः इति पुष्पांजलिं निक्षिप्य नवदेव्य
ग्रकोणमारभ्य वामावर्तेन दशादेवीः पूजयेत् मंस

पू- र्वज्ञादेवीश्री·४ षेंसर्वशक्तिदेवीश्री·४ रेंसर्वैश्वर्यप्र
७३ दादेवीश्री·४ लेंसर्वज्ञानमयीदेवीश्री·४ वेंसर्वव्याधि
विनाशिनीदेवीश्री·४ शेंसर्वाधारस्वरूपादेवीश्री·४
७३ षेंसर्वपापहरादेवीश्री·४ सेंसर्वानंदमयीदेवीश्री·
४ हेंसर्वरक्षास्वरूपिणीदेवीश्री·४ लेंसर्वेप्सितफल
प्रदादेवीश्री· इतिदशादेव्यः संपू· ह्रैं ह्क्लीं ह्सौः त्रिपुरमालि
नीचक्रेश्वरीश्री· क्रोंमहाङ्कुशामुद्राश्री·प्राकाम्यसिद्धिश्री·इति

संपूज्य विशेषार्घ्यामृतेन संतर्प्य क्रोमिति महांकुशमु
द्रां प्रदर्श्य एतानि गर्भयोगिनः सर्वरत्नाकरे चक्रे स
मुद्रा इत्यादि चक्रेश्वरीहस्ते विशेषार्घ्यामृतेन पूजां
समर्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य मूलश्रीम
हात्रिपुरसुंदरि अभीष्टसिद्धिमित्यादि षष्ठमावर
णार्चनम् इति देव्यै पुष्पांजलिं दत्वानि गर्भयोगि
नीमरुद्रायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनि

सू- मुद्रया प्रणमेत् इति षष्ठावरणपूजा ततोष्टारचक्रे
७४ पश्चाग्रगर्भे ह्रीं श्रीं सौः सर्वरोगहरचक्राय नमः
७५ इति पुष्पांजलिं निक्षिप्य अं ५ र्ब्लूं वशिनीवाग्देवता
श्री· ष कं ष ह्ल्रीं कामेश्वरीवाग्देवताश्री· ष ह्ल्रीं मो
दिनीवाग्देवताश्री· ष टं ष ह्ल्रूं विमलावाग्देवताश्री·
ष तं ष ज्म्रीं अरुणावाग्देवताश्री· पं ष ह्स्ल्व्यूं
जयिनीवाग्देवताश्री· ष यं श्क्ष्म्र्यूं सर्वेश्वरीवा

ग्देवताश्री· क्ष शं ष स्त्रीं कौलिनी वाग्देवताश्री· ह्रीं श्रीं
सौः त्रिपुरासिद्धा चक्रेश्वरीश्री· ह्सख्फ्रें खेचरीमु
द्राश्री· मुक्तिसिद्धिश्री· इति देव्यग्रकोणमारभ्यमार
भ्य वामावर्तेनाऽष्टवाग्देवताः संपूज्य विशेषार्घ्यवि
न्दुभिः संतर्प्य ह्सख्फ्रें इति खेचरीमुद्रां प्रदर्श्य एता
रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादिना
चक्रेश्वरीहस्ते विशेषार्घ्यामृतेन पूजां समर्प्य मूलेन

सू॰ मूलदेवीसंपूज्यसंतर्प्य मूलं श्रीमहात्रिपुरसुंदरि श्र
१५ भीष्टसिद्धिमित्यादिसप्तमावरणार्चनम् इति देव्याः पुष्पां
जलिनापूज्य संतर्प्य रहस्ययोगिनीमभ्यर्च्य श्रीम
हात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत् इति
सप्तमावरणपूजा ततोन्तस्त्रिकोणे बंधूककुसुमाभ
णे ह्स्रैं ह्स्क्लरीं ह्स्रौः सर्वसिद्धिप्रदचक्राय नमः
इति पुष्पांजलिं निक्षिप्य नवत्रिकोणप्रकोणयोरंतरा

लेवायव्यादीशानांतकोणेचतुष्टयेवामावर्तेनायुधदे
वताः पूजयेत् यथा ५ यांरांलांवांसांद्रांद्रींक्लींब्लूंसः यां
रांलांवांसांजंबाणकामेश्वरबाणदेवताश्री० ५ द्रांद्रीं
क्लींब्लूंसः यांरांलांवांसांद्रांद्रींक्लींब्लूंसःजंबाणकामेश्व
रीबाणदेवताश्री० ५ यां ५ थंयंयां ५ मोहनकामेश्वरचा
पदेवताश्री० ५ द्रां ५ थंयंद्रां ५ मोहनकामेश्वरीचापदे
वताश्री० ५ यां ५ ह्रींश्रांयां ५ वशीकरणकामेश्वरचापदेव

सू. वताश्री ४ ह्रांह्रीं ३ ह्रीं ग्लांह्रां ४ वशीकरणकामेश्वरीपा
२९ शदेवताश्री· ४ यां ४ क्रौं यां ४ स्तंभनकामेश्वर्यंकुशदेव
50 ताश्री· ४ ह्रां ४ क्रौं ह्रां ४ स्तंभनकामेश्वर्यंकुशदेवताश्री·
इत्यायुधदेवताः संपूज्यमेतस्य त्रिकोणे वामावर्तेन का
मेश्वर्यादिदेवीत्रयं पूजयेत् तत्राग्रकोणे प्रथमकूटम
ग्निचक्रे कामरूपपीठे मित्रेशनाथात्मके जाग्रद्दशाधिष्ठा
यके इच्छाशक्त्यात्मक रुद्रात्मशक्तिश्रीकामेश्वरीदेवी

श्री॰ वामकोणे द्वितीयं कूटं सूर्यचक्रे जालंधरपीठे ब्र
ह्मीशानाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मक
विष्णवात्मशक्ति श्रीवज्रेश्वरीदेवी॰ दक्षकोणे तृतीयं
कूटं सोमचक्रे पूर्णगिरिपीठे उड्डीशानाथात्मके सुषु
प्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मशक्ति श्री
भगमालिनीदेवी श्री॰ हसैं हसकलरीं हसौः त्रिपुरां
बिकाचक्रेश्वरी श्री॰ ह्सौः बीजमुद्रा श्री॰ इच्छासिद्धि श्री॰

पू.
११

इति संपूज्य संतर्प्य एताः परापररहस्ययोगिन्यः सर्व
सिद्धिप्रदे चक्रे समुद्राः ससिद्धयः इत्यादिना चक्रेश्वरीह
स्ते पूजां समर्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य मूलं
श्रीमहात्रिपुरसुंदरि अभीष्टसिद्धिमित्यादि अष्टमाव
रणार्चनमिति पुष्पांजलिना तदावरणपूजां देव्यै सम
र्प्य परापररहस्ययोगिनीमयूखायै श्रीमहात्रिपुरसुं
दर्यै नमः इति योनिमुद्रया प्रणमेत् इत्यष्टमावरण

मूज्ञा ततो विंडचक्रं परंब्रह्मात्मकं ध्यात्वा मूलपंचद
शीमुच्चार्य सर्वानंदमय चक्राय नमः इति पुष्पांज
लिं निक्षिप्य तत्र महोड्यान पीठे साध्य सिंहासने खस
मानाकार कामेश्वरांके स्वस्तिकासनेनोपविष्टां प्र
मुदितां श्रीललितां यथोक्तरूपां ध्यात्वा नवरीयकूट
मुच्चार्य ब्रह्मरंध्रे उड्यान पीठे श्रीचर्यानाथात्मके नवरी
यनवरी यातीत दशापि ष्ठापके परंब्रह्मात्मशक्ति श्रीम

त्रिपुरसुंदरीश्रीपादुकां पूजयामि नमः तर्पयामि नमः
इति संपूज्य विशेषार्घ्यामृतबिंदुभिः संतर्प्य मूलपंच
दशी· श्रीमहात्रिपुरसुंदरीचक्रेश्वरीश्री· पू· त· ऐं यो
निमुद्राश्री· प्रासिसिद्धिश्री· ऐं इति योनिमुद्रां प्रदर्श्य
एषा परापरातिरहस्ययोगिनी सर्वानंदमयेवैन्दवेम
हाचक्रे परंब्रह्मरूपिणी महामृतशक्तिः सर्वमंत्रेश्व
री सर्वयोगेश्वरी सर्ववागीश्वरी सर्वसिद्धेश्वरी सक

लजगदुत्पत्तिमातृकाः सचक्राः सदेवताः समुद्राः ससिद्धिः सा
युधाः सासनाः सवाहनाः सपरिवाराः सालंकाराः सर्वोपचारैः।
श्रीमहात्रिपुरसुंदरी पराया चापरया च परापरया च सपर्य्य
याः स्र जिनानतर्पितास्तु नमः इति विशेषार्घ्यामृतेन नवमी
चक्रेश्वरी हसौः पूजां समर्प्य मूलं श्रीमहात्रिपुरसुंदरी श्री
पा० पू० तं हसरैं हसकलरीं हसरौं त्रिखंडामुद्राः श्री० सर्वका
मसिद्धिप्रो० त्रिखंडामुद्रां प्रदर्श्य मूलं श्रीमहात्रिपुरसुंदरि

पू. ७५ 79

अभीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्पये तुभ्यं
नवमावरणार्चनं इति देव्याश्चरणकमले पुष्पांजलिं निक्षि
प्य श्रीपरापरातिरहस्ययोगिनीमण्डलायै श्रीमहात्रिपु
रसुन्दर्यै नमः इति योनिमुद्रया प्रणमेत् विंदुचक्रे पंचमू
लदेव्याः अथ चतुःसमयपूजा ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः
ॐ नमः इच्छाकामफलप्रदे सर्वसत्त्ववशंकरि सर्वजगत्
क्षोभकरि हूं हूं ह्रां ह्रीं क्लीं ब्लूं सः सौः ऐं क्लीं कामेश्वरीम

मयदेवताश्रीपादुकां पूजयामि नमः तर्पयामि नमः
देव्यावाम ॐ ऐं ह्रीं श्रीं ऐं ह्रीं सर्वकार्यार्थ साधयनि वज्रे।
श्वरि वज्रपदे वज्रपंजरमध्यगे ह्रीं क्लिन्ने ऐं क्रों नित्यम
दद्रवे ह्रीं वज्रनित्यायै नमः श्रीवज्रेश्वरीसमयदेवताश्री
पा. पू. त. तदहन्ते ॐ ऐं ह्रीं श्रीं श्रां ऐं भग भगे भगिनि भगो
दरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपा।
तिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने मदद्रवे

पू० भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भ
प० गक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ
क्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जें ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं
हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हूं ब्लूं
ह्रीं श्रीं भगमालिनी ममय देवता श्रीपादुकां पू० त० १
इति त्रयं पूजयित्वा श्रीपादाम्बुतेन संतर्प्य मध्ये मूल
देव्यामेव ॐ ऐं ह्रीं श्रीं क्लीं भगवति क्लूं नित्यकामेश्वरि

ह्रौं सर्वसत्ववशंकरि मः त्रिपुरभैरवि परे विश्वे क्लीं श्री
महात्रिपुरसुंदर्यै नमः श्रीमहात्रिपुरसुंदरीसमयदे
वताश्रीपा० पू० त० इति संपूज्य विशेषार्घ्यामृतेन संत
र्प्य इति चतुःसमयपूजा ॥ ओं ऊर्ध्वाम्नायपूजा नव त्रै
लोक्यमोहन सर्वाशापूरक सर्वसंक्षोभकारकेभ्यः स्थितिचक्रे
ह्स्क्लीं ह्स्क्ष्रीं ऊर्ध्वाम्नायदेवताउन्मनीदेवी श्रीपादुकां पूजयामि
नमः तर्पयामि नमः ततश्चतुर्दशारद्विदशारात्मके स्थि

पृ.
५१

त्रिचक्रे ऐं पें ह्रीं श्रीं पें क्लिन्ने ह्रीं मदद्रवे कुले हसक्रौं ह्सौं:
दक्षिणाम्नायदेवतासमयविद्याश्रीपादुकां पूजयामि न
मः तर्पयामि नमः ततो ष्टारत्रिकोणात्मके संहार २ चक्रे
ह्सौं: हसक्रौं ह्सौं: नमो भगवति ह्स्रैं श्रें फ्रें कुब्जिकायै ह्रां
ह्रीं ह्रूं अघोरे घोरे अघोर मुखि छ्रिं थि २ किनि २ विच्चे ह्सैं
हसखफ्रें श्रीं ह्रीं पश्चिमाम्नायदेवताकुब्जिकाश्रीपादुकां
पूजयामि नमः तर्पयामि नमः ततः समष्टिश्रीचक्रे ऐं पें

ह्रौं श्रीं ह्सख्फ्रें महाचंडयोगेश्वरि उत्तराम्नायाधिदेव
ता श्री कालीदेवी श्रीपादुकां पूजयामि नमः तर्पयामि न
मः ततो मूलदेवीमेव प्रथमं संपूज्य संतर्प्य ततो रक्तवर्णां
अन्नपूर्णां ध्यात्वा स्वर्णदर्वीं डग्ध्यान्नभरितं स्वर्णपात्रं
च दधानां त्रिनेत्रां चंद्रचूडां विचित्रवस्त्राभरणां मन्नपूर्णां रू
पं ध्यात्वा ह्रीं सौंः श्रीं क्लीं ॐ नमो भगवति अन्नपूर्णे अन्नं मे दे
हि स्वाहा अन्नपूर्णासुंदरी श्रीपादुकां पूजयामि नमः तर्प।

पृ. यामिनमः इति संपूज्य विशेषार्घ्यामृतेन संतर्प्य मूलेन
५२ मूलदेवीं संपूज्य संतर्प्य मूलदेव्यनुत्तराम्नायदेवताः सौः
अनुत्तराम्नायदेवतारूपां वाग्श्रीपादुकां पूजयामि नमः
तर्पयामि नमः इति संपूज्य विशेषार्घ्यामृतेन संतर्प्य मू
लदेवीं यथोक्तरूपां ध्यात्वा मूलेन संपूज्य इत्याम्नायपूजा
अपूर्वदर्शनपूजा तत्रैवं त्रैलोक्यमोहनेन चक्रे चतुरस्रत्रया
त्मके ओं तारे तुत्तारे तुरे स्वाहा तारादेव्याधिष्ठिते बौद्धदर्शन

श्रीपादुकांपूजयामिनमः तर्पयामिनमः ततःषोडशाद
ले ॐब्रह्मणेनमः ब्रह्मदेवताधिष्ठितवैदिकदर्शनश्रीपा
दुकांपूजयामिनमः तर्पयामिनमः ततोष्टदले ॐह्रौंशि
वायह्रौंःनमः रुद्रदेवताधिष्ठितशैवदर्शनश्रीपादुकां
पूजयामिनमः तर्पयामिनमः ततःचतुर्दशारे ॐह्रींहंसः
सूर्यदेवताधिष्ठितसौरदर्शनश्रीपादुकांपूजयामिनमः त
र्पयामिनमः ततोदशारद्वये ॐनमोनारायणायवि

पू. स्वदेवताधिष्ठितवैष्णवदर्शनश्रीपादुकां पूजयामि न।
८३ मः तर्पयामि नमः ततो नवयोनिचक्रे ॐ ऐं ह्रीं श्रीं ह्रीं
83 भुवनेश्वरीदेवताधिष्ठितशाक्तदर्शनश्रीपादुकां पू।
जयामि नमः तर्पयामि नमः इति षड्दर्शनसंपूज्य
श्रीपादामृतेन तर्पयेत् इति षड्दर्शनपूजा ॥

अथ छागबलिविधानं ततः वहिरेव पशुंस्नापयित्वा ने
त्रं वंध्य एवं कमंडपमध्ये समानीय ॐ मेघाकारस्तंभयमध्ये
पशुं वंधयवंधय ॐ वरुणपाशेन पशुं वंधयवंधय इति पिष्ट
लादि दृढतो द्रुवयज्ञस्तंभे यपट्टडोरादिना पशुं वंधयेत् ॐ छाग
पशवे नमः इति पादयोः पाद्यं नमः एवं अर्घ्यं स्वाहा एवोर्च्चे ॥
इदमाचमनीयं स्वाहा मुखे इदं स्नानीयं सर्वांगे ॐ वागाहीय
मुनागंगाकरतोयासरस्वती कावेरीचंद्रभागाच सिंधुभै

९. रवसागराः अजस्नानेमहेशानिमान्त्रिप्यमिहकल्पय ॐह्रांगपशवेनमः इदंस्नानीय ॐह्रांगपशवेनमः पञगंयः इति
८४ शृंगयोः ॐह्रांगपशवेनमः पतेऽक्षताः ॐह्रांगपशवेनमः
पतानिपुष्पाणिवौषट् पषधूपः अयंदीपः इदंनैवेद्यं ह्रांगपशवेनमः ॱपतदधिपतये अग्नयेनमः इतिपञ्चष्टेषु पुष्पदघान् मूलंपतत्संप्रदानरूपायैसांगोपांगायैसायुधायैसवाहनायैसपरिवारायैअमुकदेवतासहित अमुकदेव्यैपुष्पं

नमः इतिदेव्यै पुष्पांजलिंदद्यात् ततोवामहस्तंछागस्कंधेधृ
त्वा दक्षहस्तेनक्षुरादिना ॐह्रींपशुंहूंफट्स्वाहा इतिपाशु
पतास्त्रेणत्रियामंप्रोक्ष्य ॐवाक्तआप्यायतां ॐमनस्तआप्या
यतां ॐचक्षुस्तआप्यायतां ॐरसनातआप्यायतां ॐमेढ्रंतआ
प्यायतां ॐपुच्छंतआप्यायतां ॐशृंगेतआप्यायतां ॐरोमाणि
तआप्यायतां ॐवाचंतेशुंधामि ॐमनस्तेशुंधामि ॐरसनांते
शुंधामि ॐघ्राणंतेशुंधामि ॐप्राणंतेशुंधामि ॐहस्तौतेशुं।

स्नृ. याभि ॐ पादौ तेष्ठुं थामि ॐ मेढ़ं तेष्ठुं थामि ॐ मांसं तेष्ठुं थामि
८५ ॐ पायुं तेष्ठुं थामि ॐ रुधिरं तेष्ठुं थामि ॐ मज्जं तेष्ठुं थामि ॐ ना
ॐ स्लेष्ठुं थामि ॐ चक्राणि तेष्ठुं थामि ॐ रोमाणि तेष्ठुं थामि
ॐ सर्वांगानि तेष्ठुं थामि ॐ अग्निः पशुरासीत्तेनायजंत स लोकमयजद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पि
वैतानाराय: ॐ सूर्यः पशुरासीत्तेनायजंत स एतं लोकमयजद्य
स्मिन्नसूर्यः स ते लोको भविष्यति तं जेष्यसि पिवैतानाराय: ॐ वि

स्त्रः पशुरापीतेनायजंतसतनपत्तल्लोकमयजद्यस्मिन्नविष्णुः स
तेलोकोभविष्यतितंजेष्यसिपिवैनारायः ॐरुद्रः पशुराशीते।
नायजंतसतनपत्तल्लोकमयजद्यस्मिन्नरुद्रः सतेलोकोभविष्य
तितंजेष्यसिपिवैतारायः ॐसद्योजातंप्रपद्यामिसद्योजाता
यवैनमः भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॐवाम
देवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालाय।
नमोकलविकरणायनमः बलायनमोबलविकरणायनमः

९. बलप्रमथनाय नमो सर्वभूतदमनाय नमो मनोन्मनाय नमः
५८ ॐ अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो
८६ नमस्ते रुद्ररूपेभ्यः ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि
तन्नो रुद्रः प्रचोदयात् १ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभू
तानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मेस्तु सदाशि
वों ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोण
सन्नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं।

वृहत् ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरि
ष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा
ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं ऊर्वारुकमिव वंध
नान्मृत्योर्मुक्षीय मामृतात् ॐ तद्विष्णोः परमं पदं सदा पश्यं
ति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः
समिंधते विष्णोर्यत्परमं पदं ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रू
पाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते गर्भं

घ्र॰ देहिसिनीवालीगर्भंदेहिसरस्वति गर्भंदे त्वाश्विनौदेवावाध
८७ त्तांपुष्करस्रजौ ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातनः
महेरणायचक्षसे योवःशिवतमोरसःतस्यभाजयतेहनः उ
शतीरिवमातरस्तस्माअरंगमामवो यस्यक्षयायजिन्वथ आ
पोजनयथाचनः ॐवरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्ज
नीस्थोवरुणस्यऋतसदन्यसिवरुणस्यऋतसदनमसिवरुणस्यऋतस
दनमासीद इतिमंत्रोक्तं मूलंसोगामाभावरणांस्तापयासवाहनो

सपरिवारांअष्टकदेवतासहितांअष्टकदेवींत्वांअहंप्रोक्षामि इतिप्रोक्षणं अथांगन्यासः श्रोत्रयोः ॐदिशेनमः त्वचि ॐवाताय नमः चक्षुषोः ॐसूर्यायनमः घ्राणयोः ॐअश्विनीकुमारायनमः वाचि ॐअग्नयेनमः मुखे ॐसरस्वत्यैनमः कंठे ॐमहालक्ष्म्यैनमः हस्तयोः ॐइन्द्रायनमः पादयोः ॐउपेन्द्रायनमः पायौ ॐमित्रा यनमः उपस्थे ॐप्रजापतयेनमः शिरसि ॐचामुंडायैनमः स्कंधे ॐभद्रकाल्यैनमः पृष्ठे ॐगंधर्वायनमः कुक्षे ॐवीरभद्रा

२. यनमः वृषणयोः ॐवाराहेनमः उदरे ॐसप्तसमुद्रेभ्योनमः
८८ रुधिरे ॐब्राह्मणेनमः मांसे ॐविष्णवेनमः वसायां ॐरुद्रायनमः
चक्षुषि ॐजीवात्मनेनमः रोमसु ॐओषधीवनस्पतिभ्योनमः
नाडीषु ॐगंगायमुनाभ्यांनमः सर्वांगेषु ॐमरुद्गणेभ्योनमः
इति पशोरंगरक्षा ततःपशोर्दक्षिणकर्णे ॐपशुपाशायविद्महे
पशुरूपायधीमहि तन्नोपशुप्रचोदयात् ॐहिलिहिलिकि।
लिकिलिपशुरूपधराय्यैह्रींदुर्गायैवषट् इतिपशुकर्णेवारत्रयं

पठेत् ॐ नेत्रत्रयायै वौषट् इति नेत्रं बंधमोचयेत् ततः पुष्पांजा
लिं गृहीत्वा यज्ञार्थे पशवो सृष्टः यज्ञार्थे पशुघातनं अतस्त्वां घा
तयिष्यामि तस्माद्यज्ञे वधो वधः शिवाह्वानमिदं पिंडमतस्त्वा
शिवतां गतः आतुष्यसे पशो त्वं हि नाशिवस्त्वं शिवोसि हि २
पशुरूपपरित्यज्य त्वं गंधर्वस्वरूपधृक् गौरीरूपसमासाद्य मम
कल्याणदो भव १ पशुपाशविमोक्षाय हेमकूटस्थिताय च प
शोर्वचनमस्तुभ्यं नमस्ते वलिरूपिणे ४ छेद्योसि वलिरूपस्त्व

ने

सू. माज्ञायापरयागरो छेदभेदोंभवेद्धःखंत्तमखपञ्चत्रएष्टक
८९ इतिवद्धांजलिपठेत् ततःसंकल्पः ओंअद्येत्यादि श्रीअमुक
देवीप्रीतयेअमुकच्छागवह्निदैवतंदत्तयज्ञविनाशिन्यैमा
हाघोरायैयोगिनीकोटिपरिवृतायैह्रींभद्रकाल्यैमूलंअमु
कदेवतासहितअमुकदेविंदशावर्षावच्छिन्नच्छागवलिंत्व
नाहंयातयिष्ये इतिसंकल्पः अंगस्फुरणादिकंकारयित्वा
ततखड्गमादाय त्रिकोणवृत्तचतुरस्रात्मकंमंडलो।

परितामग्रादिपात्रेसंस्थाप्य: खड्गंध्यात्वा ॐअष्टवाहुः।
महातेजः श्यामश्चारक्तलोचनः भीमदंष्ट्राकरालस्या।
लोलजिह्वाभयानकः ॐखड्गायनमः इतिपाद्यादिभि
संपूज्य मूलेवागीश्वरीब्रह्माभ्यांनमः मध्ये श्रीलक्ष्मी
नारायणायनमः अग्रे ॐउमामहेश्वरायनमः इतिसं
पूज्य ॐखड्गतीक्ष्णाछिंधिछिंधिकहकह इतिखड्गमं
त्रेणिजप्त्वा ॐअसिवीरमनश्चैवतीक्ष्णायारोडरासद।

१९. योगभौविजयश्चैवधर्मपालनमोऽस्तुते करवालक
५. पाणत्वंचंडिकायाकरेस्थितः पशुरक्तप्रदानेनवांछ
डाभीतिमावह इतिनमस्कृत्य खङ्गकारदक्षिणहस्ते
नखङ्गमुद्रांदर्शयित्वा खङ्गमादाय ॐकालिकालि।
महाकालिकालिकेकालरात्रिके छिंधिछिंधिफट् हथि
रंपिबपिबमांसंभक्षयभक्षयस्वाहा इतिपशुस्कंधेख
ङ्गंस्पर्शयेत् ततःछेदकर्तृःतिलकादिकंकृत्वा त

स्वाहा स्नेखेड्डं दद्यात् ॐ वीरायास्तरनाशाय शक्तिका

र्यार्थतत्परः पश्चाच्छेदत्वयापीडं वीरनायनमोस्तु


ते इतिप्रणम्य एकाघातेन पशोर्घातयेत् ततः दे

व्यावामभागे त्रिकोणहृत्

चतुरस्रात्मकोपरिच्छागा।

मुंडं सरक्तं स्थापयित्वा रु

धिरामृतेन देवीं तर्पयेत्



९. मूलं ॐ कौशिकी रुधिरेणाप्यायन्तां इति त्रिवारं तर्प
यित्वा शेषरुधिरं स्थापयित्वा ततः छागमुण्डं पूजये
त् ॐ दिव्यकपालाय नमः ॐ रुधिरवदनाय नमः
ॐ सिद्धाय नमः ॐ सिद्धगात्राय नमः ॐ बीजपुरुषा
य नमः इति संपूज्य प्रदीपवर्त्तिकां गृहीत्वा मूलं।
अमुकदेवि अमुककपालं गृह्ण गृह्ण भक्षय भक्ष
य स्वाहा इति प्रदीपवर्त्तिका पञ्च शिरसि दद्यात्।

यावद्विंषकरोमाणिदीपोदहतिभैरव तावद्वर्षसह
स्राणिगौरीलोकंसगच्छति इतिसमर्प्य एकभागवलि
द्वयंकृत्वा ईशाने ॐविदारिकायैनमः आग्नेये ।
ॐपापराक्षस्यैनमः नैर्ऋत्ये ॐपूतनायैनमः वा
यव्ये ॐकौशिकैनमः ॐरक्तदंतिकायैस्वाहा इति
समर्पयेत् ततःपुष्पांजलिंगृहीत्वा ॐमहिषघ्नि
महामायेचामुंडेमुंडमालिनि आयुरारोग्यमे।

ए.
५२ सर्यंदेहिदेवि नमोस्तुते इति देव्यै समर्प्य: कृ
तयापूजासांगतासिद्धये इमानि दक्षिणा समर्प
यामि नम: इतिक्षागबलिविधानम् ॥ ॐ
ह्रीं श्रीं सर्वयोगिनीभ्य: सर्वभूतगणेभ्य: सर्वभू
ताधिपति डाकिनीभ्य: शाकिनीभ्य: इमांपूजागृ

ह्ना २ स्वाहा सर्वयोगिनीश्रीपा० पू० त० इतिपश्चिमद्वा
रे पूर्वद्वारेत ४ क्षांक्षेत्रपालायनमः क्षेत्रपालश्रीपा०
पू० त० दक्षिणद्वारे ॐ श्रीं ह्रीं क्लीं ग्लौं गंगणपतयेवर
दसर्वजनंमेवशमानयस्वाहा महागणपतिश्रीपा०
उत्तरद्वारे ॐ ह्रींवटुकायापदुद्धारणायकुरु २ वटु
कायह्रींवटुकभैरवश्रीपा० इतियोगिन्यादिपूजांत
तः प्रणवत्रितारमूलांतेममत्वप्रकटगुप्तगुप्ततरसं

सू·
९३

93

प्रदायक्रकुलकौलनिगर्भरहस्यपरापररहस्यपराप्रा
तिरहस्ययोगिनीहृदसंस्थितश्रीचक्रगतसमस्तदे
वता श्रीपा·पू·त· ततः श्रीचक्राद्बहिः रिंद्रादयः शक्ति
रूपाः पूज्याः लं इंद्रशक्तिश्री· रं अग्निशक्तिश्री· टंयम
शक्तिश्री· तंनिर्ऋतिशक्तिश्री· वंवरुणशक्तिश्री· यं
वायुशक्तिश्री· संसोमशक्तिश्री· हंईशानशक्तिश्री·
इंईशानयोर्मध्ये ब्रह्मशक्तिश्री· निर्ऋतिवरुणयो

मध्ये ह्रींअग्नेनशक्तिश्री· तद्वहिरिंद्रादिसमीपे व
ज्रशक्तिश्री· शक्तिशक्तिश्रीः दंडशक्तिश्री· खड्गश
क्तिश्री· पाशशक्तिश्री· ध्वजशक्तिश्री· गदाशक्तिश्री·
त्रिशूलशक्तिश्री· पद्मशक्तिश्री· चक्रशक्तिश्री· इति
संपूज्य संतर्प्य पुनर्गंधादिदीपांतानुपचारान्समर्प्य
ऋष्यादिकरषडंगन्यासपूर्वकं मूलं संजप्य पुनर्मा
सात्कृत्वा गुह्यातिगुह्यगोप्त्रीत्वमित्यादिना देव्यैसामा

ओं दकेन जप्यं समर्प्य योनिमुद्रया प्रणमेत् ततउ
दग्भागे त्रिकोणहृन्नमेड लेसा धारं वलि पात्रे निधा
य सर्वभूतेभ्यो नमः इति गंधादिभिर्भूतानि संपूज्य
ओं ह्रीं सर्व विघ्नकृद्भ्यः सर्वभूतेभ्यो हूं स्वाहा सर्वभू
तेभ्य एष बलिर्नमः इति वामकर सर्वांगुलीभिर्वलि
मुत्सृजेदिति सर्वभूतबलिः ततः कवचसहस्रना
म स्तोत्र पाठं कृत्वा चेत्तावादन पूर्वं स्तोत्रं पठेत् श्री

मक्षीकोपाह्दयेपंचसिंहासनात्मकाम् फलेक
त्ललनानोचवाफरन्नस्फुरकलेम् चन्द्रयीयतना
नेदिचन्द्ररत्नयकोशागम् निस्पानेदिपरंव्रलयाम
नैमिसर्वामधे गणेशग्रहनक्षत्रयोगिनीराशि
पिणीम् देवींमंत्रमयींनैमिमात्वकांपीठरूपिणी
गा° म् प्रणमामिमहादेवींमात्वकांपरमेश्वरीम् कालहल
हलोलोलकलनाशमकारिणीम् दत्तैकमोत्रणी
य

सं सिद्धे स्पर्धते नरः रविनाड्येन्दुकं दर्पं शंकरानलवि
भृभिः यदक्षरशाशिज्योत्स्नामंडितं भुवनत्रयं वंदेस
र्वेश्वरीं देवीं मातृकां परमेश्वरीम् यदक्षरमहासूत्र
प्रोतमेतज्जगत्त्रयं ब्रह्मांडादिकटाहांतं तां वंदे सि
द्धमातृकाम् यदेकादशमाधारं बीजं कोणत्रयो
द्भवम् ब्रह्मांडादिकटाहांतं जगदद्यापि दृश्यते अ
कचादिटतोन्नद्धपयशाक्षरवर्गिणीं ज्येष्ठांगबाहु

मृ-
९५

९५

न्तृष्ठकटिपादनिवासिनीम् तामिकारान्तरोद्भासांसा
रात्सारांपरात्पराम् प्रणमामिमहादेवींपरमानंद
रूपिणीम् अद्यापियस्याजानंतिनमनागपिदेवताः
केयंकस्मात्ककेनेतिसरूपारूपभावनाम् वंदेताम
हमक्षय्यक्षकारान्तररूपिणीम् देवींकुलकलोल्लोल
प्रोल्लसंतींपरांशिवाम् वर्णानुक्रमयोगेनयस्यावर्गा
ष्टकंस्थितम् वंदेतामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीम्

पू: ६८

कामपूर्णजकाराख्यश्रीपीठान्तर्निवासिनीम् चतुरा
ज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् एवं द्वादशभिः
श्लोकैः स्तवनं सर्वसिद्धिकृत् देव्यास्त्वखण्डरूपायाः
स्तवनं तव तन्यतः इति स्तुत्वा पुष्पांजलिमादायाऽन्यै
श्च वैदिकैः पौराणिकैः स्तवैः स्तुत्वा देवीं प्रार्थयेत् किं
किङ्कः स्वं दनुजदलनि लीयते न सुरताग्रे काकासि
द्धिः स्वरवरनुते प्रार्थ्यते नार्चितायाम् काकाकीर्तिः कु

लकमलिनि व्याप्तेनस्तनायां केकंयोगतत्वयिन
चिन्तुते चित्तमालंबितायाम् सर्गसंसर्गसंरंभस्फा
रिताशेषविभ्रमे चिद्वृंदमंडलांतःस्थेनमस्तेहरव
ल्लभे जगदाह्लादनोद्योतयोगभोगविधायिनी स्थि
तिभावस्थितेगोरिनमः स्थाणुप्रियेविके भावाभाव
पृथग्भावस्वभावोदयधर्मिणि चैतन्यपंचकेदेविनम
स्तुभ्यंहृदंगगते सृष्टिस्थित्युपसंहारप्रसङ्गतपदोदये

द्रु॰
स्त॰
९७

विद्धि श्रीति महासत्तामात्रेमात्रे नमोऽस्तु ते ब्रह्मार्कपी
तकिरणाब्रलचक्रोंतरोदितेचतु ष्पीठपरिशिवेत
मस्त्रिपुरसुंदरि चराचरमिदं विश्वं प्रकाशयसिपा
स्य मातृकारूपमास्थायतस्यै मातनेमोऽस्तु ते सद्
ताभवभयेहेसि पूजितासिशुभंकरि स्नाता त्वं वा ह्नि
नेवस्त्रदारुसिकरुणाकरे भक्तस्यैमेनिशं पूजायुक्त
स्य परमेश्वरि वाग्भवादि महासिद्धिं देहि त्रिपुरसुंद

रि परमानंदसंदोह प्रमोदभरनिर्भरे ङः त्वव्रयप
रिम्लानवदनं ब्राह्मि मां शिवे शाह्वब्रह्ममये स्वच्छे
देवि त्रिपुरसुंदरि यथाशक्तिजपं पूजां गृहाणप
रमेश्वरि यत्मया क्रियते कर्मजाग्रत्स्वप्नसुषुप्ति
षु तत्सर्वं तावकी पूजा भूयाद्भूत्यै नमः शिवे यत्म
योक्तमिह्याज्ञानात्तन्महत्स्वल्पमेव वाहं तत्सर्वं जग
ह्वा विदितं तद्धमयमंजलिः हे नाथे हे नम महामोहशर्वरी

सू. त्तपगत्तमः भास्वानिवजयत्येकोगणेशोहृतरीयुतः प्र
१८५ तिभासागरोल्लासोनिशाकरइवापरः हृतिप्रकः सजय
५८ तिवट्कलाङ्कवान्वितः षड्विंशात्तत्त्वमरितंद्वेत्रंयः पा
९४ लयत्यलम् देवेत्रेपंतमहंहंनोमिवारुणाख्यंमहाबल
म् चतुष्पीटनिवासिन्योयोगेश्वर्योमहाबलाः चतु
ष्षष्टिप्रकारास्तानिसंवेदेकुलागताः भेदाभेदमहामो
हविवर्तपरिमंडिताम् आपूरयंतीसमयांद्वात्रिंशार्णा

नमामि नाम् इति पुष्पांजलिभिः संपूज्य नमस्तेनाथ भग
वन्नित्यादिस्तोत्रेण श्रीयुक्तं स्तुत्वा सर्वशक्तिक्रमोद्भूति
प्रभूम्नोहमिहात्मिकाम् देवस्यदेवतांकांचित्संवित्स्व
त्वमयीमाश्रये इति नमस्कारमुद्रां दर्शयेत् ततःप्रद-
क्षिणानि कृत्वा सर्वमंगलमंगल्ये शिवे सर्वार्थसाधके
शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते इत्यनेन साष्टा
ङ्गप्रणामेन भूमौ स्खलितपादानां भूमिरेवावलंबनम्

९- त्वयि ज्ञातापराधानां त्वमेव शरणं शिवे अपराधो भवत्ये
व सेवकस्य पदे पदे कोऽपरः सहते लोके केवलं स्वामि
५५ नं विना अपराधसहस्राणि क्रियन्तेऽहर्निशं मया दा
सोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ज्ञानतोऽज्ञान
११ तो वापि यन्मया क्रियते शिवे मम कृत्यमिदं सर्वमिति
मातः क्षमस्व मे इति प्रणतिपूर्वकं बद्धघात्तमाप्याः श्रौ
दकेपाञ्जनेरणादाय ष इतः पूर्वं प्राणबुद्धिमनोदेहधर्मा

धिकारतो जायत स्वमसस्तुत्यवस्थासुमनसावाचा
कर्मणापद्भ्यामुदरेणशिश्नायत्स्मृतं यदुक्तं यत्स्मृ
तं तत्सर्वंगुरुदेवतासमर्पितमस्तुस्वाहा मां मदीयं
च सर्वं श्रीमहात्रिपुरसुंदर्यैसमर्पयेॐ तत्सत् ३
ततिदृक्षाम्मरणारविंदयो रंहीतोदकदानेनात्मान
मर्पयेत् ततःकृतांजलिर्भूत्वा यद्दत्तं भक्तिमात्रेण प
त्रंपुष्पंफलंजलम् निवेदितंचनैवेद्यंतद्गृहाणानुकं

पया आवाहनं न जानामि न जानामि विसर्जनम् पूजां मा
गं न जानामि त्वं गतिः परमेश्वरि कर्मणा मनसा वाचा त
तो नान्या गतिर्मम अंतश्चारेण भूतानां रक्ष त्वं परमेश्व
रि मातर्योनिसहस्रेषु येषु येषु व्रजाम्यहं तेषु तेषु च्यु
ता भक्तिरच्युतेस्तु सदा त्वयि देवी धात्री च मोक्षा च देवी
सर्वमिदं जगत् देवी जयति सर्वत्र या देवी सोहमेव हि
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् तत्सर्वं क्षमस्व ॥

देवीशिकस्यनस्ख ल्लितंमनःत्वमस्वदेवदेवेशित्रि
पुरेदेवपूजिते तवपादांबुजेनित्यंनिश्चलाभक्ति
रस्तुनः इतिक्षमाप्ययोनिमुद्रयाप्रणमेत साधुवाऽ
साधुवाकर्मयद्यदाचरितंमया तत्सर्वंकृपयादे
विगृहाणाराधनंमम इत्यनेनदेव्याःशिरसिशंखंत्रिः
परिभ्राम्य किंचिज्जलंदत्वातेनैवस्वात्मानमस्मान्साम
यिकांश्चप्रोक्षयेत ततःपुष्पांजलिमादाय रश्मिरूपाम

पू॰ हादेव्याश्चत्रपूजितदेवताः श्रीसंदर्यगलीनाम्नाः संत
८८ सर्वाः शुभावहाः इत्यनेन श्रीयंत्रत्तिपेत् नमो मूला
२०१ ने भगवति श्रीमहात्रिपुरसुंदरि नमस्त्वांतिप्रणतिष्ट
101 वैकेनालत्रयेण देवीप्रबोध्य नेत्रेण मयो विविंस गच्छ
गच्छ परे स्थाने स्वस्थाने परमेश्वरि यत्र ब्रह्मादयो देवा न
विदुः परमं पदं इति निमील्या पुष्पेत्वां सम्मुखं स्यां ग्राय
हृदयकमलमानीय तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वरि

यत्रब्रह्मादयः सर्वे स्वगास्तिष्ठंति मेहृदि इति तत्र स्था
पयित्वा मानसैरुपचारैः संपूज्य ॐ उत्तिनीरूपेणमू
लाधारे स्थापयेत् ततः पूर्णाम्यां त्रिकोणवृत्तचतुरस्र
मंडले देवीनिर्माल्यन ष ऐं नम उच्छिष्टचांडालिनि
मातंगि सर्ववशंकरि स्वाहा शेषिका श्रीपादुकां पू
जयामि नमः इत्यनेन निर्माल्यवासिनीं संपूज्य देव
नाथ गुरो स्वामिन्देशिक स्वात्मनायक त्राहि त्राहि कृपा

पू.
८५
१०२

सिंयो पूज्यो पूर्णतरां कुरु इति श्रीगुरुं प्रार्थ्य विशेषार्घ्य
पात्रे शिरःस्थिताय नमे निवेद्य च श्रीगुरुपादुकां विद्या
ते अमुकानंदनाथ श्रीपादुकां तर्पयामि नमः इति त्रिःसं
तर्प्य तद्रव्यं आत्मपात्रे किंचित् निधाय च आत्मतत्त्वाय न
मः च विद्यातत्त्वाय नमः च शिवतत्त्वाय नमः सकलत
त्त्वाय नम इति तत्त्वत्रयं विन्यस्य च प्रकृति बुद्ध्यहं
कार मनः श्रोत्र त्वक् चक्षु जिह्वा घ्राण वाक्पा ::

102

णिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायु
ग्निजलपृथिव्यात्मकाशुद्धचतुर्विंशतितत्वसहितं
श्रें श्रीं ॥ ४४ आत्मतत्वात्मकस्थूलदेहं शोधयामिस्वाहा ४
मायाकलाविद्यारागकालनियतिपुरुषात्मकशुद्धाऽ
शुद्धसप्ततत्वसहितं कं वं ३३ विद्यातत्वात्मकंसू
क्ष्मदेहं शोधयामिस्वाहा ॥ ४ शिवशक्तिसदाशिवेश्व
र शुद्धविद्यात्मके यं रं टं शिवतत्वात्मकं परदेहं शोध

पू. यामित्याह। षट्शिवशक्तिसदाशिवेश्वरशुद्धविद्यामा
पं. याकलाविद्यारागकालनियतिपुरुषप्रकृतिबुद्ध्यहं
८३ कारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायू
103 पस्थशब्दस्पर्शरूपरसगन्धाकाशवाय्वग्निजलपृ
थिव्यात्मकशुद्धमिश्राशुद्धषट्त्रिंशत्तत्त्वसहितं ब्रह्माण्ड
मूलं सर्वतत्त्वस्थूलसूक्ष्मपराख्यदेहत्रयाभिमानि
नं जीवात्मानं शोधयामित्याह ॥

इति वारचतुष्टयेन स्वीकृत्य एवं पात्रं कराभ्यामादाय
मूलविद्यागुरुपादुकान्ते अंतर्निरंतरनिरिंधनमेध
मानें मायांधकारपरिपंथिनि संविदग्नौ कस्यांचिदद्भुतम
रीचिविकासिभूमौ विश्वं जुहोमि वसुधादिशिवाव
सानम् इति सर्वं जुहुयात् ततः ओं ह्रां ह्रीं सः श्रीसूर्य
पघने अर्घः स्वाहा इति सूर्यायार्घ्यं दत्वा कृतांजलि
र्भूत्वा यज्ञच्छिद्रं तपःछिद्रं यच्छिद्रं यजने मम अछि

इमस्तत्सर्वं भास्करस्य प्रसादतः कृत्स्वच्छिइमव-
धार्य मूलेन प्राणायामरूप्यादिकरषडंगन्यासावि-
धाय गुरुस्तोत्रपठितात्स्वात्मानं देवीस्वरूपं भाव-
यन्सर्वविघ्नहरेदिति नमस्तेनाथ भगवञ्छिवा-
यगुरुमूर्तये विद्यावतारसंसिद्धौ स्वीकृताने-
कविग्रह १ नवायनवरूपाय परमार्थैकरूपि-
णे सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते २

स्वतंत्राय दयात्तसविग्रहाय परात्मने परतंत्राय
भक्तानां भव्यानां भव्यरूपिणे ३ विवेकिनां विवेका
य विमर्शाय विमर्शिनाम् प्रकाशिनां प्रकाशाय ज्ञा
निनां ज्ञानरूपिणे ४ पुरस्तात्पार्श्वयोः पृष्ठेन मस्तकोर्ध्व
मुपर्यधः सदाशिवरूपेण विधे हिमवदासनम् ५
चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि प्रभि
न्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः त्रयश्चत्वारिं

षाठसदलकलाश्रत्रिवलय त्रिरेखाभिः सार्धंत
वभवनकोणाः परिणताः ॥

105

ॐ श्रीगुरवे दक्षिणामूर्तये नमः श्रीनाथादिगुरुत्रयं ग
णपतिं पीठत्रयं भैरवं सिद्धौघं बटुकत्रयं पदयुगं दू
तीक्रमं शांभवम् वीरान्द्व्यष्टचतुष्कषष्टिनवकं वीरा
वलीपंचकं श्रीमन्मालिनि मंत्रराजसहितं वंदे गुरो
र्मंडलम् संसिद्ध्यर्थं नमस्कारास्तु रमितन्मो लिख्यत
प्रोल्लसत्सहस्रप्रभवप्रकृष्ट विभवप्रेंखत्स्मूरखोऽत्र
लम् श्रेयो विघ्नमहामयप्रशमने दिव्यां यदेको घ्यंभू

उ॰ याम्रे द्विरदाननांबिकमलं द्वंद्वं तदिष्टाप्तये आरक्ता
१ भात्रिनेत्रांमणिमुकुटवतीरत्नताटंकरम्या हस्ताम्भो
जैः सपाशांकुशमदनधनुःसायकैर्विस्फुरंतीम् आ
पीनोत्तुंगवक्षोरुहतटविलसत्तारहारोज्ज्वलांगी
ध्यायामंभोरुहस्थामरुणनिवसनामीश्वरीमीश्व
राणाम् आनंदसुंदरपुरंदरमुक्तमाल्यमौलौहटे
ननि हितं महिमासरसपादांबुजं भवतमेविज

घायमंजु मंजीरशिंजितमनोहररमंबिकायाः श्री
मंडेरवषीविरप्रविलसद्वंडामदनालाविंतेत्रा
धीश्वरयोगिनीगणमहासिद्धैः समाराधितं श्रीन
दागमकं महात्मकमिदंमाहात्म्यविखंडामृतं वंदे श्री
प्रथमंकरांबुजगतं पात्रं विशुद्धिप्रदम् इदंतेपात्र
सन्नवितवामंमेनाशतक्रतवपूर्णोहवोमधुरसमथा
य विश्वाययदभिहर्यंतिदेवाः इदंतापात्रसंभूतमहं

ओ॰ तापरमात्मतम् पराहं तामयेव ह्रीं ओं ह्रीं मिशिवद्रूपि
२ णि इदं पवित्रममृतं पिवामि भवभेषजम् पशुपाश
समुच्छेदकारणं भैरवोदितम् चितेस्वातंत्र्यसारैवा
तस्यानंदमयत्वतः तन्मयत्वाच्च भावानां भावाश्चात
र्हितारेस स्वस्वातंत्र्यविकासायत्वरसः स्वेनपीयते
तस्मादिमां महारूपां सुरां हं तां पिवाम्यहं ओं अग्नि
र्ज्वलति ज्योतिर्ज्वलति ब्रह्माहमस्मि योहमस्मि ब्रह्मा

हमस्मि सोहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्मा
हमस्मि अहमेवाहं मांजुहोमि स्वाहा अं आं इं ईं उं ऊं
ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः प्रकृत्यहंकारबुद्धिमनः
श्रोत्रत्वक्चक्षु जिह्वाघ्राणवाक्पाणिपादपायूपस्थ
शब्दस्पर्शरूपरसगंधाकाशवाय्वग्नि सलिलपृथि
व्यात्मकाश्चतुर्विंशतितत्त्वसहितमात्मतत्त्वात्म
के स्थूलदेहं शोधयामि स्वाहा इति गुरुपादुकामूलं

ओं नेज्जहोमि परमामृततमिति सर्वान्कामयिकानाथ एवाज
१ षस्वेतितनुर्ङ्क्तिं गृहीत्वा कुण्डलिनीरूपपरदेवतामुखा
3 रविंदे जुहोमीति भावनया जुहुयात् हेमसिंधुरसाव
हृदयितया दत्तं चपेयादिभिः किंचिच्चलरक्तपंकज
दृशा सानंदमुद्वीक्षितम् वामे स्वाङ्क विष्णुद्रुमसुद्विशक
लेपाशेनि पायात्मके वेदपात्रमहं द्वितीयमध्याने
देकसंवर्धनम् मनोज्ञोतिर्जघतामाज्यं स्थितं संयन्तं

ददात् याधुष्णाउ घसोनिम्लोचस्तासं ददामिहवि
षाहुतेनस्वाहा इदंतापात्रसंभूतमिमांदिव्याइंज्व
लतीस्यंतेप्राग्वसदिता कं खंगंघंङं चंछंजंझंञंटं
ठंडंढंणंतंथंदंधंनंपंफंबंभंमं मायाकलाविद्या
रागकालनियति पुरुषात्मकषड्डाप्तुडसमतत्वस
हितं विद्यातत्त्वात्मकं सूक्ष्मदेहं शोधयामि स्वाहा २
सर्वाम्नायकलाकलापकलितं कौतूहलो योतनं

ॐ वंदोपेंद्रमहेंद्रशंभुवरुणब्रह्मादिभिः सेवितं ध्याने
४ देवगणैः परैर्मुनिगणैर्मोक्षार्थिभिः सर्वदावेदणात्र
महत्तत्वीयमपुनास्वात्मावबोधप्रदम् आप्यायय
स्वमंत्रेसोमसहस्रिभावावाजस्रसंतप्ये इदंतापात्र
संभूतमित्यादिश्रा ईज्वलंतीसंतप्राग्वत्पठित्वा॥
यं रं लं वं शं षं सं हं लं क्षं शिवाशक्तिसदाशिवेश्व
रशुद्धविद्यात्मकपंचतत्वसहितम् ::

शिवतत्वात्मकं कारणदेहं शोधयामि स्वाहा स्वात्म
मूलत्रिकोणस्थे सूर्यकोटिसमप्रभे कुंडल्याकृति
चिद्रूपे हृनेदद्वंसमंत्रकम् इमचंमीनरसावहं
हरिहरब्रह्मादिभिः सेवितं मुद्रामैथुनयर्मकर्मति
रंतल्लाराम्लतिकाश्रितम् आचार्याष्टकसिद्धभैरव
कलाम्यासेन संशोधितं पायात्सवमकारतत्त्वसहितं
पात्रेचतर्प्यं नमः शिवतत्वात्मकंकारणदेहंशोधय

ॐ. यामिस्वाहा॥ अथ आधारेभुजगाधिराजवलये पार्श्वेमही
५ मंडले द्वीपैः सप्तसमुद्रवारिपिहितेचाष्टौचदिग्दंति
5 नः सोहं भैरवमर्चयत्यतिदिने तारागगौरत्तेने गादि
सप्रसुविस्वगस्वरगणेगज्ञाकरैः किंकरैः धर्मी
यभकलासुपाडुतरसंवेदेसुविः संस्तुनं हूती
यागक्रलाघसंभ्रमरंतयुगंर हस्पाडुतम आने
दोड्डवनादविंडकलयायोगपलसंडैरवैः पीतंत्र

लिरसंमहोदयकरं पात्रं भजे पंचमम् वियातत्वा
त्मकं सूक्ष्मदेहं शोधयामि स्वाहा ५ सच्छुन्नामलभ
द्रपीठपरमानंदोदयादायकं रम्यं राज्यकरं सदास
त्वकरं सायुज्यसाम्राज्यदम् नानाव्याधिभयापका
रं हरं गंजन्मांतरध्वंसनं षष्ठीमहं द्वेषभैरवीप्रियकरं
पात्रं च षष्ठं नुमः आत्मतत्वात्मकं स्थूलदेहं शोधया
मि स्वाहा ६ जायत्स्वप्नसुषुप्तिबोधपरतश्चैतन्यसत्तिपदं

ॐः विद्युद्भास्करवह्निजिष्णुयत्नुर्घांज्योतिष्कलाव्यापितम्
९ येडापिंगलमध्यगाविरलयातस्याः प्रबोधोदयं पांत्र
सगमप्रसरेणनतकरुणानंदप्रदंपान्तुमाम्ध्यात्मतत्वेशो
पयाश्रितत्वाहा॥२॥ ऐंह्रींश्रीगुरुपादुकांचानतलकेकेठपि
सारस्वतश्रोत्रेर्वीगवलशौर्यवृद्धिहरणंदेहस्थितेःका
रणाम वांछाप्तिहिकांरमनःस्थितिकरंवशप्रजगया
पिनां पात्रेचात्ममममसिद्धिकरंप्रोत्फुल्लतापंभजे वि

यातत्वंपोषयामिस्वाहा ८ सर्वानंदकरंसदासुख
करंसवीर्थसम्पत्प्रदं सायुज्यार्थकरंसमलसुखदंवा
ज्ञानविध्वंसनम् आयुःकांतियशोविवर्धनकरंसंसा
रमोहच्छिदंपात्रेलत्तयुगात्मकंचनवमंपोषयाम्यहम्
नेभजे शिवतत्वंशोधयामिस्वाहा ९ बलविप्रमहे
शानांदेवानांचविशेषतः दुर्लभंपावनंपात्रंदशमं
प्रणमाम्यहं १० पापघ्नंशांतिशुभदंदिव्यंस्वादुसुखाल

पू· यम पात्रमेकादशं वंदे गुरुसेवासमुल्लागतम् पात्रं कृत्वा
७ करे मंत्री सर्वकर्म लभेत्सुधी इह लोके स्त्रियं भुक्त्वा
देहान्ते भैरवो भवेत् करे पात्रं सुविस्तात्रमानंदो हृदयां
बुजे भक्तिर्गुरुपदांभोजे स्मरणं किमतः परम् पके
नस्तु षट्कवड्केन चटं पिवामिवा पी पिवामि सहस्रा
लवणाद्देकेण आस्वाद्यमांसमलितेहिनस्तुङविडंडंग
गपिवामियस्तुनां सहस्रागरेण करमालामुविहला

वामेशमास्तु कोमला हृदये त्रिपुराबाला यागशाला
गृहे गृहे पात्रं भैरवपात्रे गोत्रं श्रीनाथपादुका गोत्रे शा
स्त्रं संविच्छास्त्रज्ञानं तत्त्वावबोधकं ज्ञानम् अलिपिशि
तपुरं श्रीभोगपूजापरोहं बहुविधकुलमार्गारंभ
संभावितोहम् पशुजनविमुखोहं भैरवीमाश्रितो
हं गुरुचरणरतोहं भैरवोहं शिवोहम् वामेशमारम
णाकुशलादक्षिणेचालिपात्रमध्येमुद्राचणकवट्टकाः

पू-
८

स्तकरस्योघ्राणशुद्धिः स्वकंदेवीणामरसकवितासक्त
प्यासहृन्नूणां कौलोमार्गः परमगहनोयोगिनाम
प्यगम्यः वामेचेद्दस्तु(वी)सुविवमदिरापात्रकरांभोरु
हे मूर्ध्निश्रीगुरुचिंतनंभगवतीध्यानास्पदंमानस
म् जिह्वायांजपसाधनेपरिणतिः कौलक्रमाभ्या
सेन येसंतोनियतंपिबंतिमरसंतेभुक्तिमुक्तीगताः
धर्माधर्मसहविहीनेस्वात्मागैनोमनसास्वचा ::

स्तसुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा
प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचम् ध
र्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहं स्वाहा या
वन्न चलते दृष्टिर्यावन्न चलते मनः तावत्पानं प्र
कर्तव्यं पशुपानमतः परम् पीत्वा पीत्वा पुनः पीत्वा
यावत्पतति भूतले उत्थाय च पुनः पीत्वा पुनर्जन्म
न विद्यते इदं तत्पात्रसंभूतमित्यादि श्याईं ज्वलतीमे

सू. ५ नेष्वागवन्मठेत् ततः अकारादितांतांमातृकामुद्रा
र्थशिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकला
१ विद्या रागकालनियतिपुरुषप्रकृत्यहंकारबुद्धि
मनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायू
पस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलि
लपृथिव्यात्मकशुद्धमिश्राशुद्धषट्त्रिंशत्तत्वात्मके
स्थूलसूक्ष्मपराख्यदेहत्रयाभिमानिनेजीवात्मानं

शो धयामिस्वाहा गुरुपादुकांमूलमंत्रमुच्चार्यश्रं
तनिरंतरनिरिंधनमेधमानेमायाथकारपरिपं
थिनिसंविदग्नौ कस्मांचिदद्भुतमरीचिविका
सिभूमौविश्वंजुहोमिवसुधादिशिवावसानम्
सकलतत्वंजुहोमिस्वाहा इतिपात्रवंदनम् ॥

ॐ स्वस्तिश्रीगणेशाय नमः

पूजाविधिः

पूजापद्धतिः

२

परशिवानन्दनाथ
परप्रकाशानन्दनाथ
परशक्त्यम्बा
कौलेशानन्दनाथ
शुक्लादेव्यम्बा
कुलेश्वरानन्दनाथ
वामेश्वर्यम्बा

भोगानंदनाथ
क्रीडानंदनाथ
समयानंदनाथ
सहजानंदनाथ
गगनानंदनाथ
विश्वानंदनाथ
विमलानंदनाथ

मदनानंदनाथ
१ भुवनानंदनाथ
लीलाम्बा
स्वात्मानंदनाथ
प्रियाम्बा
श्रीमद्दायादेवानंदनाथ
श्रीमदाह्लाददेवानंदनाथ

श्रीशिवानंदमणिराम
वाजपेयानंदनाथ ॥
श्रीस्वामिज्ञानानंदनाथ
श्रीलक्ष्म्यंबा

श्रीस्वामिसाहिबकौलानंदनाथ

श्रीदेव्यंबा

श्रीज्योतिष्प्रकाशकौलानंदनाथ

श्रीभगवत्यंबा

श्रीगोविंदकौलानंदनाथ

श्रीशारदाम्बा

श्रीमहानदकौलानंदनाथ

श्रीभाग्यवत्यंबा
२ श्रीमच्छ्रीस्वामिप्रतापकौलानंदनाथ
श्रीमधुमत्यंबा सावित्र्यंबा श्रीदयावत्यंबा
श्रीमच्छ्रीस्वामीश्रमरकौलानंदनाथ
श्रीजयमालांबा श्रीदेवमालांबा